# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१३)

११.१०.२०११

- प्रियाष्टन्  (शस्) अस्
- पियाष्ट्न्     अस्   (‘अल्लोपोऽनः’ - ६.४.१३४ - इति अल्लोपः)
  - ‘ष्टुना ष्टुः’ (८.४.४१) इति नकारस्य ष्टुत्वं प्राप्नोति ।
- इह पूर्वस्मादपि विधौ अल्लोपस्य स्थानिवद्भावात् न ष्टुत्वम् ।
- अल्विधित्वात् ‘स्थानिवदादेशोऽनल्विधौ’ इति न भवति ।
- ‘अचः परस्मिन् पूर्वविधौ’ इत्यत्र ‘पूर्वस्य विधौ’ इति विग्रहे तेनापि स्थानिवद्भावो न भवति । नकारः स्थानिभूताद् अचः (अकारात्) परः, न तु पूर्वः । तस्य च कार्यम् इष्यते ।

- ‘अचः परस्मिन् पूर्वविधौ’ इत्यत्र ’पूर्वविधौ’ इति पदस्य अपरः विग्रहः अङ्गीक्रियते - पूर्वस्मात् विधिः = पूर्वविधिः ।
- पूर्वस्मात् परस्य विधौ कर्तव्येऽपि अनेन स्थानिवद्भावो भवतीत्यर्थः ।
- अत्र स्थानिभूताद् अचः = अकारात् पूर्वः = टकारः, तस्मात् परस्य= नकारस्य विधिः कर्तुम् इष्यते ।
- एतद्विग्रहस्वीकारेण अत्रापि स्थानिवद्भावस्य सत्त्वात् ष्टुत्वं न भवति ।

- कार्यकालपक्षे बहिरङ्गस्य अल्लोपस्य असिद्धत्वाद् वा ।
- संज्ञानां परिभाषाणां च प्रवृत्तौ पक्षद्वयम् - यथोद्देशपक्षः, कार्यकालपक्षः च ।
- यथोद्देशपक्षः - यत्र संज्ञानां परिभाषाणां वा उपदेशः, तत्रैव विधिसूत्राणां संस्कारः । अस्मिन् पक्षे त्रिपाद्यां संज्ञासूत्राणां परिभाषासूत्राणां च प्रवृत्तिः न भवति ।
- कार्यकालपक्षः - यत्र विधिसूत्राणाम् उपदेशः, तत्रैव संज्ञा-परिभाषेण एकवाक्यतया विधिसूत्रसंस्कारः । अस्मिन् पक्षे त्रिपाद्यामपि संज्ञानां परिभाषाणां च प्रवृत्तिः भवति ।

- उभावपि पक्षौ व्याकरणसम्प्रदाये अङ्गीक्रियेते ।
- कुत्र कः पक्षः आश्रयणीयः इत्यत्र लक्ष्यानुरोधात्, व्याख्यानाद्वा निर्णयः ।

- सम्प्रति, यथोद्देशपक्षे अङ्गीकृते त्रिपादीस्थस्य ष्टुत्वस्य विषये सपादसप्ताध्यायीस्थायाः अन्तरङ्गपरिभाषायाः प्रवृत्तिः न भवति ।

- कार्यकालपक्षे तु अन्तरङ्गपरिभाषायाः प्रवृत्तिः भवितुम् अर्हति ।

- तदा, अन्तर्भूतनिमित्तकत्वात् ष्टुत्वम् अन्तरङ्गम् ।
- बहिर्भूत-शस्प्रत्यय-निमित्तकत्वात् अल्लोपः बहिरङ्गः ।
- ‘असिद्धं बहिरङ्गमन्तरङ्गे’ इति परिभाषया अन्तरङ्गे ष्टुत्वे कर्तव्ये बहिरङ्गः अल्लोपः असिद्धः । अल्लोपस्य असिद्धत्वात् ष्टुत्वं न भवति ।